শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী সম্পত্তৈয্যন্গার্ ব্বিরচিতং

# ॥ শ্রী লক্ষ্মীপঞ্চকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী লক্ষ্মীপঞ্চকম্ ॥

শ্রীচাপল্যমহো নু কিং জনিজুষাং নূনং কথং ভাৱযে
    মূঢো দুষ্কৃতিসাহসী পরধনপ্রেপ্সুঃ কদর্যো ধনী।
রাগোদ্রোধকনাট্যকেলিচতুর স্ত্রীপুঞ্জনশ্চেশ্ৱরঃ
    ৱিদ্ৱান্সাধুরনাৱিলাত্মতনুভৃদ্দৈৱাদ্ধতস্তপ্যতে॥ 1 ॥

কামং সন্তু কলাভিমানৱনিতা যূনাং জনানাং প্রিযাঃ
    নির্লজ্জপ্রকট প্রদর্শনকলাকালুষ্যমাতন্ৱতী।
ৱিদ্যা হি প্রভৱত্যমঙ্গলমনোভাৱং জনিত্রীমলম্
    ধর্মপ্রাশনৱেশ্যৱশ্য জনতা নাশায সংপ্রেরিতা॥ 2 ॥

ঐশ্ৱর্যং ন কদাপি সদ্গতিপথক্রান্তি প্রৱাহপ্লুতান্
    রাজ্যাঙ্গারহবদ্ধকঙ্কণধিযো ধর্মোপদেশেন তান্।
সংক্ষুব্ধান্নযতি প্রতাপপৱনপ্রারব্ধনির্মূলনে
    কিং ৱা তস্য হৃদাশযো ভগৱতো লক্ষ্মীপতিৎৱে রতিঃ॥ 3 ॥

সামান্যেন জনঃ শ্রিযং ধনসুখপ্রাপ্তেঃ পরাং দেৱতাং
    সম্ভাৱ্যৈৱমুদাত্তভাৱৱিধুরঃ পূজাং ৱিধত্তে দিনম্।
রক্ষিত্রী ভৱবন্ধনাৎ বুধজনপ্রাপ্তেঃ প্রকর্ষোদ্বহা
    মোক্ষাধ্ৱপ্রচযপ্রকাশমনসাং নিত্যং পরং দৈৱতম্॥ 4 ॥

মাতঃ শ্রীর্হৃদি মে সদা নিৱস তে কারুণ্যমাবিভ্রতী
    দেহি জ্ঞানমমোঘমঞ্জলিজুষঃ কিং ৱা পরং প্রার্থযে।

কো ৱা জ্ঞানমৱাপ্য চৌপনিষদং সৌখ্যং তটিৎসন্নিভম্
ৎৱত্তঃ প্রার্থ্য ৱিনিষ্কৃতিং স লভতে ধ্যেযং সুদুর্মেধসাং॥ **5**॥

॥ শ্রী লক্ষ্মীপঞ্চকং সমাপ্তম্॥